## ४४. ढिंपुरीस्तवः[†] ।

उत्तुङ्गैर्विविधैर्नगैरुपलसच्छायैरभिभ्राजिता,
श्री**वीर**प्रभु**पार्श्व-सुव्रत-युगादी**शादिबिम्बैर्युता ।
पल्ली भूतलविश्रुता नियमिनः श्री**वङ्कचूल**स्य या,
सा भूत्या चिरमद्भुतां कलयतु प्रौढिं पुरी **ढिंपुरी** ॥ १ ॥
व्योमचुम्बिशिखरं मनोहरं **रन्तिदेव**[1]तटिनीतटस्थितम् ।
अत्र चैत्यमवलोक्य यात्रिकाः शैत्यमाशु ददति स्वचक्षुषोः ॥ २ ॥
मूलनायक इहान्त्यजिनेन्द्रश्चारुलेपघटितोद्भटमूर्तिः ।
दक्षिणे जयति **चेल्लणपार्श्वो** भात्युदक् तदपरः फणिकेतुः ॥ ३ ॥
एकत **आदिजिनो** वृजिनो ऽतोऽन्यत्र[2] पुन**र्मुनिसुव्रत**नाथः ।
[3]एवमनेकजिनेश्वरमूर्तिः स्फूर्तिमदभ्रचकास्ति जिनौकः[4] ॥ ४ ॥
अत्रा**म्बिका** द्वारसमीपवर्तिनी श्री**क्षेत्रपालो** भुजषट्कभास्वरः ।
सर्वज्ञपादाम्बुजसेवना[5]ऽलिनौ संघस्य विघ्नौघमपोहतः क्षणात् ॥ ५ ॥
यात्रोत्सवानिह[6] शितौ [7]महसो दशम्यामालोक्य लोकसमवाय[8]विधीयमानान् ।
संभावयन्ति भविकाः कलिकालगेहे प्राघूर्णकं कृतयुगं ध्रुवमभ्युपेतम् ॥ ६ ॥
अमरमहितमेतत् तीर्थमाराध्य भक्त्या, फलितसकलकामाः सर्वभीतीर्जयन्ति ।
बहलपरिमलाढ्यं चन्दनं प्राप्य यद्वा क इव सहतु तापव्यापमालिङ्गिताङ्गम् ॥ ७ ॥
वन्द्या नन्द्यादघहतिदृढा **ढिंपुरी**तीर्थरत्नम्,
यामध्यास्ते सुरतरुरिव प्रार्थितार्थप्रदायी ।
**पद्मावत्या** भुजगपतिना चाविमुक्तांह्रिपार्श्वः,
कायोत्सर्गस्थित[9]वपुरयं **चेल्लणः पार्श्वनाथः** ॥ ८ ॥
शशधरहृषीकाक्षिक्षोणीमिते ( १२५१ ) शकवत्सरे,
गृहमणिमहे संघान्वीता उपेत्य पुरीमिमाम् ।
मुदितमनसस्तीर्थस्यास्य प्रभावमहोदधे-
रिति विरचयां चक्रुः स्तोत्रं **जिनप्रभ**सूरयः ॥ ९ ॥

**॥ इति ढिंपुरीस्तोत्रम् ॥**

॥ ग्रं० १६ ॥

---

† Pa C ढिंपुरीस्तवस्त्वयम् । 1 B रन्तिदेवकीर्तिंतटिनी° । 2 Pa नान्यात्र । 3 Pa एक° । 4 C जनौकः ॥ 5 Pa °केशना° । 6 C यात्रोत्सवानिहि । 7 B Pa सहसो । 8 Pa समवायि° । 9 Pa स्थिति° ।